अज्ञानतिमिराच्छन्नं ज्ञानदीपेन चक्षुषा ।
यः सर्व्वार्थं दर्शयति तत्परः कोऽपि बान्धवः ॥
गुरुदत्तेन मन्त्रेण तपसेष्टसुरं लभेत् ।
सर्व्वज्ञत्वं सर्व्वसिद्धिं तत्परः कोऽपि बान्धवः ॥
पितरं मातरं भार्य्यां गुरुपत्नीं गुरुं परम् ।
यो न पुष्णाति कापथ्यात् स महापातकी शिव ! ॥
नास्ति वेदात् परं शास्त्रं न हि कृष्णात् परः सुरः ।
नास्ति गङ्गासमं तीर्थं न पुष्पं तुलसीपरम् ॥
क्षमावती भूपरा न पुत्त्रान्नास्ति परः प्रियः ।
न च दैवात् परः शक्तो व्रतं नैकादशीं विना ॥
शालग्रामात् परो यन्त्रो न क्षेत्रं भारतात् परम् ।
परं पुण्यस्थलानाञ्च पुण्यं वृन्दावनं यथा ॥
मोक्षदानां यथा काशी वैष्णवानां यथा शिवः ।
न पार्व्वत्याः परा साध्वी न गणेशात् परो वशी ॥
न च विद्यासमो बन्धुर्नास्ति कश्चिद्गुरोः परः ॥"
इति ब्रह्मवैवर्त्तपुराणे गणपतिखण्डे ४४ अध्यायः ॥

परःशतं, त्रि, शतात् परम् । शताधिकसंख्या । इत्यमरः । ३ । १ । ६४ ॥

परःश्वः, [ स् ] य, श्वो दिनात् परमहः परःश्वः परः सहस्रवत् पारस्करादित्वात् सुट् परःश्व इति मधुः । सुटं नेच्छन्त्यन्ये परश्व इत्याहुः । अतिक्रान्ते पूर्व्वतरे दिने परश्वो जात इति प्रयोगे गौणः तत्र परश्च तत् श्वश्चेति कर्म्मधारयः । इति भरतः ॥ श्वः पराहः । इत्यमरः । ३ । ४ । २२ ॥ परशु । इति भाषा ॥

परःसहस्रं, त्रि, सहस्रात् परम् । सहस्राधिकसंख्या । इत्यमरटीका ॥

परकीयं, त्रि, ( परस्येदम् । "गहादिभ्यश्च ।" ४ । २ । १३८ । इति छः । "कुगजनस्य परस्य च ।" इति कुक् ।) परसम्बन्धि । (यथा, मनुः ।४।२०१।
"परकीयनिपानेषु न स्नायाच्च कदाचन ॥")

परकीया, स्त्री, ( परकीय+टाप् । ) नायिकाभेदः । अस्या लक्षणं यथा । अप्रकटपरपुरुषानुरागा । सा च द्विविधा । परोढ़ा १ कन्यका च २ । कन्यायाः पित्राद्यधीनतया परकीयत्वम् । अस्या गुप्तैव सकला चेष्टा ॥*॥
परोढ़ा यथा,—
"अयं रेवाकुञ्जः कुसुमशरसेवासमुचितः
समीरोऽयं वेलादरविलसदेलापरिमलः ।
इयं प्रावृड्धन्या नवजलदविन्यासचतुरा
पराधीनं चेतः सखि ! किमपि कर्त्तुं म्लायते ॥"*
गुप्ताविदग्धालक्षिताकुलटानुशयानामुदिताप्रभृतीनां परकीयायां एवान्तर्भावः । गुप्ता त्रिविधा । वृत्तसुरतगोपना १ वर्त्तिष्यमाणसुरतगोपना २ वर्त्तमानसुरतगोपना च ३ ।
त्रिविधा यथा,—
"श्वश्रूः कुप्यतु विद्विषन्तु सुहृदो निन्दन्तु वा यातरस्तस्मिन् किन्तु न मन्दिरे सखि ! पुनः स्थापो विधेयो मया ।
आखोराक्रमणाय कोणकुहरादुत्फालमातन्वती
मार्ज्जारी नखरैः खरैः क्षतवती कां कां न मे दुर्द्दशाम् ॥" * ॥
विदग्धा द्विविधा । वाग्विदग्धा १ क्रियाविदग्धा चेति २ । प्रथमा,—
"निविड़तमतमालमञ्जिवल्ली-
विचकिलराजिविराजितोपकण्ठे ।
पथिकसमुचितस्तवाद्यतीव्रे
सवितरि तत्र सरित्तटे निवासः ॥"
द्वितीया यथा,—
"दासाय भवननाथे बदरीमपनेतुमादिशति ।
हेमन्ते हरिणाक्षी पयसि कुठारं विनिक्षिपति ॥" * ॥
लक्षिता यथा,—
"यद्भूतं तद्भूतं यद्भूयात्तदपि वा भूयात् ।
यद्भवतु तद्भवतु वा विफलस्तव गोपनायासः ॥"*
कुलटा यथा,—
"एते वारिकणान् किरन्ति पुरुषान् वर्षन्ति नाम्भोधराः
शैलाः शाड्वलमुद्वमन्ति न वदन्त्येते पुनर्नायकान् ।
त्रैलोक्ये तरवः फलानि सुवते नैवारभन्ते जनान्
धातः ! कातरमालपामि कुलटाहेतोस्त्वया किं कृतम् ॥"
अपि च ।
"पृथ्वी तावत्त्रिकोणा विपुलनदनदीग्रावरुद्धं तदर्द्धं
तस्यामेवास्ति शैलो विपिनमपि तथा क्षेत्रकासारकूपाः ।
लोकानामर्द्धनारी शिशुरपि जरसः कोऽपि रोगी विवेकी
मिथ्यावादी ममायं सुखरसुखवरः पुंश्चली पुंश्चलीति ॥" * ॥
अनुशयाना त्रिविधा ।
वर्त्तमानस्थानविघट्टनेन भाविस्थानाभावशङ्कया स्थानधिष्ठितसङ्केतस्थले भर्त्तगमनानुमानेन प्रत्येकं उदाहरणानि ।
"समुपागतवति चैत्रे निपतति पत्रे लवङ्गलतिकायाः ।
सुदृशः कपोलपाली शिव शिव तालीदलद्युतिं लेभे ॥"*॥
"निद्राणकोकिमिथुनानि कपोतपोत-
व्याधूतनूतनमहीरुहपल्लवानि ।
तन्वापि तन्वि ! न वनानि कियन्ति सन्ति
खिद्यस्व न प्रियतमस्य गृहं प्रयाहि ॥
कर्णकल्पितरसालमञ्जरी-
पिञ्जरीकृतकपोलमण्डलः ।
निष्पतन्नयनवारिधारया
राधया मधुरिपुर्निरीक्ष्यते ॥" * ॥
मुदिता यथा,—
"गोष्ठेषु तिष्ठति पतिर्वधिरा ननन्दा
नेत्रद्वयस्य न च पाटवमस्ति यातुः ।
इत्थं निगद्य सुतनुः कुचकुम्भसीम्नि
रोमाञ्चकञ्चुकमुदञ्चितमाततान ॥" * ॥
कन्यका यथा,—
'किञ्चित्कुञ्चितहारयष्टिसरलभ्रूवल्लिसाचिस्मितं
प्रान्तभ्रान्तविलोचनद्युतिभुजा पर्य्यस्तकर्णोत्पलम् ।
अङ्गुल्या स्फुरदङ्गुलीयकरुचा कर्णस्य कण्डूयनं
कुर्व्वाणा नृपकन्यका सुकृतिनं सद्याजमालोकते ॥"
इति रतिमञ्जरी ॥

परक्षेत्रं, क्ली, ( परस्य क्षेत्रं पत्न्यादि ।) परपत्नी । ( यथा, मनुः । ३ । १७५ ।
"तौ तु जातौ परक्षेत्रे प्राणिनौ प्रेत्य चेह च ।
दत्तानि हव्यकव्यानि नाशयेते प्रदायिनाम् ॥")
परशरीरम् । परभूमिः । यथा,—
"इयापेहि परक्षेत्रादायाति क्षेत्ररक्षकः ।"
इति चन्द्रालोकः ॥
( तथा च मनुः । ८ । ३४१ ।
"द्विजोऽध्वगः क्षीणवृत्तिर्द्वाविक्षू द्वे च मूलके ।
आददानः परक्षेत्रान्न दण्डं दातुमर्हति ॥" )

परग्रन्थिः, पुं, ( परेण ग्रन्थिर्यत्र । ) पर्व्वावधिः । अङ्गुलिपर्व्व । इति हारावली ॥

परच्छन्दः, त्रि, ( परस्य छन्दो यत्र । ) पराधीनः । इति हेमचन्द्रः ॥

परच्छिद्रं, क्ली, (परस्य छिद्रम् ।) परदोषः । यथा,
"नीचः सर्षपमात्राणि परच्छिद्राणि पश्यति ।
आत्मनो बिल्वमात्राणि पश्यन्नपि न पश्यति ॥"
इति गरुड़पुराणम् ॥

परजातः, त्रि, ( परेण जातः । परपुष्टत्वात्तथात्वम् । ) परैधितः । औदासीन्येन परपुष्टः । परपोषितत्वात् । परस्माज्जातः । इत्यमरभरतौ ॥ अन्येनोत्पन्नश्च ॥ (कोकिले पुं । एष हि काकेन पुष्टो भवतीति प्रसिद्धिः ॥ )

परजितः, त्रि, (परेण जितः ।) परपुष्टः । शत्रुणा पराजितः । इति केचित् ॥

परञ्जः, पुं, (परं जयतीति । जि जये + बाहुलकात् डः । ) तैलयन्त्रम् । छुरिकाफलः । फेनः । इति मेदिनी ॥

परञ्जनः, पुं, ( परायाः पश्चिमस्या दिशो जनः स्वामी । निपातनात् साधुः । ) वरुणः । इति हेमचन्द्रः ॥

परञ्जयः, पुं, ( परां पश्चिमां दिशं जयति स्वामित्वेन । जि+अच् । सर्व्वनाम्नः वृत्तौ पुंवद्भावः मुम् च । ) वरुणः । इति त्रिकाण्डशेषः ॥ शत्रुजयकर्त्ता । परान् जयतीति खप्रत्ययनिष्पन्नः ॥

परतन्त्रः, त्रि, ( परस्तन्त्रं प्रधानं यस्य । ) पराधीनः । इत्यमरः ॥ (यथा, महाभारते । १३।२।१५।
"परतन्त्रं कथं हेतुमात्मानमनुपश्यसि ।
कर्म्मणां हि महाभाग ! सूक्ष्मं ह्येतदतीन्द्रियम् ॥"
परस्य तन्त्रं इति विग्रहे क्ली । परकीयशास्त्रम् । परं श्रेष्ठं तन्त्रमिति विग्रहे । उत्कृष्टशास्त्रम् । उत्तमपरिच्छदम् ॥ )

परत्रभीरुः, त्रि, ( त्र परलोकान्तरघटनाविषये भीरुः । ) धार्म्मिकः । परकालभयशीलः । यथा,—